सर्वाधिकतया प्रशंसनीयास्ताः खलु- रमाचौधुरी-वेलादेवी-अर्चनापुरी-गौरीधर्मपालाः। संस्कृतसाहित्ये विशेषतः संस्कृतनाट्यसाहित्ये तासां योगदानं चिरं स्मरणीयं स्थास्यति। जयश्रीनाग-कल्पिकामुखर्जी-इलाघोष-सुनीतावर्मन-स्वयम्भादासादयः काव्यकवितानुवादैश्च स्वप्रतिभां प्रकटितवत्यः।

## २.१.१. रमाचौधुरी - (१९११-१९९१)

रमाचौधुरी सुधांशुमोहनवसुमहोदयस्य कन्या असीत्। एषा रवीन्द्रभारती-विश्वविद्यालयस्य प्रथमा महिला उपाचार्या अभवत्। वङ्गेषु संस्कृतमहिलानाट्यकाररूपेण एषा प्रथमा। अपि च केषाञ्चिन्मतेन कवयित्रीषु अर्वाचीनसंस्कृतनाट्यसाहित्येतिहासे नाट्यकाररूपेण एषा एव प्रथमा। एषा नैकान् प्रबन्धान् रूपकाणि च व्यरचयत्। प्रायः विंशत्यधिकसंस्कृतनाट्यानां रचयित्री एषा। अधुना एतस्या नाटकानि आलोच्यन्ते किञ्चित्।

**कविकुलकोकिलम्**-कालिदासं केन्द्रीकृत्य तया नाटकद्वयं लिखितम्। एकं तावत् कविकुलकोकिलम्।

**कविकुलकमलम्**-इदमपि नाटकं कालिदासं केन्द्रीकृत्य रचितम्।

**मेघमेदूरमेदिनीयम्**-इति तया कालिदासस्य मेघदूतमवलम्ब्य नवदृश्यसमन्वितं नाटकं लिखितम्। ऋताचट्टोपाध्यायमतेन This drama depicts, the same, in a lively poectic manner and is, as such a new welcome contribution to the vast and variegated *meghadūta* literature.

**शङ्करशङ्करम्**-अद्वैतवादिनः शङ्कराचार्यस्य जीवनं दर्शनञ्च आधारीकृत्य लिखितमिदं नाटकम्। नाटकं समीक्ष्य सातकडिमुखार्जिना लिखितम्- "What has surprised me most is the wonderful ease and flow with which the present work represents to us the most abstruse philosophy of the great Advaitin Shankara. Who could have ever thought that any one would be able to serve the same under the guise of a drama? But the supremely efficient and infinitely courageous Dr. Rama has been able to perform. Who could have thought her capable of producing such a superb dramatic work on

Shankara's holy life and teachings, in such a beautiful, poetic, enchantinh easily intelligible language? Further, the numerous verses in different metres as well as the songs add much to the great glory of this exhilarating work of great literary and other kinds of merits."

**देशदीपम्**-एकस्य महतो नायकस्य जीवनमाधारीकृत्य लिखितमिदं नाटकम्। स खलु नायको देशाय प्राणान् दत्तवान्। अत्र कविना ग्राम्यपरिवेशस्य एकं सुन्दरं चित्रं चित्रितम्। वृक-कुक्कुट-पेचकादिपक्षिणां कथा अस्मिन् नाटके स्थानं लभते।

**नगरनूपुरम्**-मयूखस्य कथामाश्रित्य दशदृश्येषु लिखितमिदं नाटकम्।

**पल्लीकमलम्**-लोककथामवलम्ब्य रचितमिदं नाटकम्। कमल-कलिकारूपकुमारयोः प्रेमकथां केन्द्रीकृत्य ग्राम्यसंस्कृतिं च संलक्ष्य कविना नवदृश्यात्मकमिदं नाटकं लिखितम्। नाटकस्य भाषा सरला सुमधुरा च।

**संसारामृतम्**-एकस्य दरिद्रपरिवारस्य कन्याया दुःखमयं जीवनमवलम्ब्य सप्तदृश्येषु समाप्तमिदं नाटकम्। मयूखनामको कश्चन तां बालिकां प्रतारितवान्। अनन्तरं प्रतारिता सा बाला मयूरनामकमेकं धनिनं पर्यणयत्। किन्तु स मयूर आसीत् चरित्रहीनः। किन्तु तस्या बलिकायाः संस्पर्शेन स शीघ्रं परित्यजति तस्य कुचरित्रम्।

**अभेदानन्दम्**-श्रीरामकृष्णस्य मुख्यस्य शिष्यस्य अभेदानन्दस्य पवित्रं जीवनं शिरसिकृत्य कवयित्र्या द्वादशदृश्यात्मकमिदं नाटकं लिखितम्।

**निवेदितानिवेदितम्**-द्वादशदृश्यात्मकमिदं नाटकम्। अत्र निवेदिताया जीवनं लिपिबद्धम्। रमारञ्जनमुखार्जिना अस्य समालोचनायामुक्तम्- "Dr. Rama Chowdhuri selects the theme of her drama '*niveditā-niveditam*' from *Rāmakṛṣṇa Vivekānanda* movement describes the life and activities of *Sister Niveditā*, the ardent devotee and disciple of *Lord Kṛṣṇa* and *Svāmī Vivekānanda*." इति। (Sanskrit drama in last five decades: The bengal scenario)

**युगजीवनम्**-श्रीरामकृष्णस्य जीवनं तस्य भावादर्शश्च अस्य नाटकस्य

विषयवस्तु। अत्र शब्दव्यवहारस्य स्वाधीनता, गीतस्य प्रयोगः, वङ्गीयशब्दानुगमनञ्च लक्षणीयं वर्तते। यथा- "न हि देवपूजा यथेच्छखेला।" अत्र क्रीडाशब्दं परित्यज्य खेलाशब्दस्य व्यवहारो दर्शनीयः। पुनश्च

"सुरापान करिना आमि,
सुधा खाइ 'जय काली वले'।
आमाय मन माताले माताल करे,
सव मद माताले माताल वले॥" इति।

वङ्गीयगीतस्य संस्कृतानुवादस्तावत् कविना कृतमनया रीत्या-

"नाहं सुरापानासक्तः
'जय काली'-ध्वनि-विधानपरः
केवलं सुधापानारक्तः
केवलं जननीचरणधरः॥" इति। (५/६४)

**भारताचार्यम्**-भारतस्य द्वितीयराष्ट्रपतेः सर्वपल्लीराधाकृष्णमहोदयस्य जीवनम् अस्य नाटकस्य विषयवस्तु। अपि च तस्य दार्शनिकी भावनापि अत्र प्रकटिता। द्वादशदृश्यात्मकमिदं नाटकम्।

**रामचरितमानसम्**-तुलसीदासस्तावत् रामचरितमानसस्य रचयिता। स तस्य पत्न्या अनुप्राणितः सन् रामचरितमानसं लिखितवान्। अत्र तस्य एव कथा लिपिबद्धा।

**भारततातम्**-षट्दृश्यात्मकमिदं नाटकम्। महात्मागान्धी एव नाटकस्य प्रधान नायकः।

**चैतन्यचैतन्यम्**-पञ्चदृश्यसमन्वितमिदं नाटकम्। चैतन्यस्य कृष्णप्रेम, बाल्यावस्था, ईश्वरभक्तिश्चात्र आलोच्यन्ते।

**रसमयरासमणिः**-राज्ञ्या रासमणिदेव्या आदर्शजीवनम् अत्र अष्टदृश्येषु दर्शितम्।

**प्रसन्नप्रसादम्**-साधकरामप्रसादस्य जीवनमाधारीकृत्य दशदृश्येषु लिखितं रूपकम्।

**गणदेवतानाटकम्**-वङ्गेषु श्रेष्ठ औपन्यासिकस्ताराशङ्करवन्द्योपाध्यायः। तस्य

जीवनकथा एव अस्मिन् नाटके दर्शिता।

अग्निवीणानाटकम्-नजरुलकवेः जीवनशैली अत्र प्रदर्शिता।

भारतपथिकम्-ब्राह्मसमाजस्य प्रतिष्ठाता भारतपथिकः राममोहनः कथङ्कारं भारतस्य उन्नतिसाधने व्रती अभवदिति पञ्चदृश्येषु दर्शितम्।

यतीन्द्रयतीन्द्रम्-इति सा स्वस्वामिनो जीवनमवलम्ब्य रचितवती। १९८४ खीष्टाब्दे सेप्टेम्बरमासे लिखितमिदमप्रकाशितं वर्तते।

एतेषु नाटकेषु कुत्रचित् संवेदना, आवेगपरायणता कुत्रचिद्वा दुःखानुभूतिः, सहानुभूतिः, रसानुभूतिश्च संलक्ष्यन्ते। भाषायाः सारल्यम्, वर्णनाया नैपुण्यम्, सामञ्जस्यं चात्र दृश्यन्ते।

एतस्याः प्रायः सर्वाणि नाटकानि व्यक्तिजीवनमूलकानि। महापुरुषाणां सम्मानार्थं कवयित्र्या इमानि नाटकानि लिखितानि। एतस्या नाटकीया भाषा वङ्गभाषावत् सरला। यथा वङ्गभाषायां "टाका माटि माटि टाका"-इत्यस्य संस्कृतभाषायाम्- "मुद्रा मृत्तिका मृत्तिका मुद्रा" इति। (युगजीवनम्, प्रथमदृश्यम्)। क्वचिदत्र वङ्गभाषायाः प्रयोगोऽपि दृश्यते। यथा-

"दुत्तेरि उन्मत्तजनो न प्रशमनीयः......." इति। (तत्रैव)

अपि च नाटकेषु सङ्गीतानामपि प्रयोगो दृश्यते। यथा-

"इच्छाजातं तव सर्वं<br>
इच्छामयी तारासि त्वम्।<br>
तव कर्म करोषि त्वमस्य<br>
लोके वदति करोम्यहम्॥" इति। (तत्रैव)

कवीनां रचनासु कुत्रचिद् विषयस्य नूतनत्त्वं कुत्रचिद्वा भाषायाः सरलीकरणं संलक्ष्यते। नाटकेषु अङ्कशब्दव्यतिरेकेण दृश्यशब्दस्य प्रयोगोऽर्वाचीनत्त्वं द्रढयति। अपि च महापुरुषाणां जीवनग्रन्थावलम्बनेन विषयस्याभिनवत्वं प्रकाशते।

### २.१.२. ब्रह्मचारिणी बेलादेवी (१९१९)

ऊनविंशत्यधिकोनविंशतितमे ईशवीयवर्षे पश्चिमवङ्गान्तर्गतनदीयामण्डले बेलादेवी अजायत। योगेन्द्रनाथतर्कतीर्थ-कालीपदतर्काचार्ययोः शिष्येयं वङ्गभाषायां संस्कृतभाषायां च सुदक्षा दक्षिणेश्वरे आद्यापीठस्थे बालिकाश्रमे